M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 168

Title: Mahamari Shanti

Sati

168

Mahāmāri Shānti	: Title
	: Author
	: Editor
Saka 1828	: Year, Vols.
	: Publisher
168	: Remarks

म.शां. दयानिधे ॥१६॥ मेरौकैलासशिखरे हिमाद्रौगंधमादने ॥ नित्यंप्रियकृतावासेमेदोमांसबलिप्रिये ॥१७॥ महासैन्यसमायुक्तेसर्वप्राणिविहिंसि
नि ॥ सर्वाभिचारिकेदेविसर्वरक्षस्वसर्वदा ॥१८॥ यत्रकुत्रस्थलेवापियस्मिन्कस्मिन्यदातदा ॥ रक्षमांरक्षमांदेविसपुत्रपशुभृत्यकं ॥१९॥
५ मांगल्येमंगलार्थेदेविमहामंगलदायिनि ॥ लोकानाश्वासया ऽऽशुत्वंमंगलेमंगलप्रिये ॥२०॥ इतिस्तुत्वामहादेवींभक्तिभावेनसंयुतः ॥ भुंजीत
स्वजनैर्युक्तोदेवतांमनसास्मरन् ॥२१॥ यदास्वगृहवेशेषुध्वांक्षारावोभविष्यति ॥ काकशांतिंततःकृत्वागृहंगंतुमुपक्रमेत् ॥२२॥ सुमुहूर्तेसु
नक्षत्रेअलंकृत्यततोगृहं ॥ ब्राह्मणैर्बंधुभिःसार्धंसंविशेत्गृहमासनः ॥२३॥ स्वस्तिवाच्यद्विजेभ्यश्चशांतिसूक्तपुरःसरं ॥ दक्षिणांचहिरण्या
दिदद्यात्शाठ्यविवर्जितः ॥२४॥ ब्राह्मणान्भोजयेत्पश्चाद्देवतांप्रार्थयेत्गृहं ॥ गच्छगच्छमहादेविदेवतेमंगलंकुरु ॥२५॥ एवंकृतेविधानेनमा
रिकाशांतिमुत्तमां ॥ जायतेनात्रसंदेहोसत्यंसत्यंसमीरितं ॥२६॥ इत्येतत्कथितंदेव्याआत्मसंभवकारणं ॥ माहात्म्यंपठ्यतेयस्तुसोपिमांग
ल्यमाप्नुयात् ॥२७॥ इतिश्रीभविष्योत्तरपुराणेभगवत्युक्तामहामारिकाशांतिः ॥ शके१८२८पराभवसंवत्सरेवैशाखकृष्णैकादश्यांगुरौधू
पकरोपनाम्नाहरीमहेश्वरभट्टशर्माऽलिखदिदं ॥ श्रीःशुभंभ. ॥

श्रीगणेशायनमः अथमहामारीशांतिः भविष्योत्तरपुराणे सूतउवाच पुरोकैलासशिखरेदेवदेवंजगद्गुरुं ॥ प्रणम्यपरयाभक्त्यापार्वतीशिवमव्ययं
॥१॥ देव्युवाच ॥ पुराब्रह्मातुमांस्पष्ठ्वासमाहूयाब्रवीद्वचः ॥ शृणुमद्वचनंदेविकृणुष्वममशासनं ॥२॥ कलौजनादुराचाराराजानश्चतथावि
धाः ॥ अतोगत्वाभुवंदेविमृत्युरूपाभवाम्भुच ॥३॥ परद्रव्यापहर्तारःपरस्त्रीनिरताःसदा ॥ परपीडापरनिंदाराजानस्तुकलौयुगे ॥४॥ दे
वस्वहरणाऽऽसक्ताब्रह्मस्वहरकान्नृपाः ॥ तेषांदोषवशात्त्वंतुजनान्संहरनित्यशः ॥५॥ ब्रह्मणैवंसमादिष्टाइंद्राद्यैःसुरसत्तमैः ॥ भुवंसमा
गतातत्रजनान्वीक्ष्यचपापिनः ॥६॥ राज्ञोदोषात्पुरस्कृत्यग्रामेग्रामेवसाम्यहं ॥ तत्रापिपापिनंहत्वापुनर्ग्रामांतरंव्रजे ॥७॥ एवंदेशानटित्वा
हंसर्वान्संहृत्यैवजनान् ॥ पुनर्गच्छामिसदनंब्रह्मणःपरमेष्ठिनः ॥८॥ एवंमदागमंज्ञात्वाब्राह्मणाःपुण्यकृन्नरः ॥ विचार्यशास्त्रतोनित्यं
जागरूकोभवेद्दलं ॥९॥ पतंतिमूषकायत्रनृत्यंतिविरमंतिच ॥ तद्गृहंतत्क्षणेत्यक्त्वासकुटुंबोवनंविशेत् ॥१०॥ तत्रशांतिंप्रकुर्वीतमहादेव्यास
मीरिता ॥ जपित्वाचमहामंत्रंपठित्वास्तोत्रमुत्तमं ॥११॥ ॐ नमोभगवतिमहामारिकेमृत्युरूपिणिसकुटुंबंमामवस्वाहा ॥ वनेजलाशयंगत्वा
चो ऊर्ध्वबाहुरधोमुखः ॥ वीरासनेसमुपविश्यजपेन्मंत्रमहात्मकं ॥१२ संस्थाप्यप्रतिमांतत्रधूपदीपोपहारकैः ॥ संस्थाप्यविधिवत्पश्चाज्जुहु
यात्सहनरः ॥१३॥ हरिद्राचूर्णमिश्रेणचित्रान्नेनाज्यसंयुतं ॥ समिद्भिःखादिरैर्भक्त्याब्राह्मणैःसुसमन्वितः ॥१४॥ पत्नीपुत्रान्वयेभक्त्या
जुहुयादनुवासरं ॥ होमांतेचपठेन्नित्यंस्तवमेतंजितेंद्रियः ॥१५॥ नमोदेविमहादेविसर्वलोकभयंकरि ॥ सर्वदासर्वदामह्यंकृपांकुरु

रेवैः॥ प्रनो मित्राय वरुणाय [illegible] चोना[illegible]मो [illegible]ग्मो[illegible]ग्नये
च॥ वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः॥
२ यछंतु चंद्रा उपमन्नो अर्कमानः कामं पूपुरंतु स्तवानाः॥ उद्वे
ति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणां॥ चक्षु
र्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक् तमांसि॥ उद्वेति
प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य॥ समानं चक्रं प
र्याविवृत्सन्यदेतशो वहति धूर्षु युक्तः॥ विभ्राजमान उषसा
मुपस्थाद्रेभैरुदेत्यनुमद्यमानः॥ एष मे देवः सविता चछं
द यः समानं न प्रमिनाति धाम॥ दिवो रुक्म उरुचक्षा उदे
ति दूरे अर्थस्तरणिर्भ्राजमानः॥ नूनं जनाः सूर्येण प्रसू
ता अयन्नर्थानि कृणवन्नपांसि॥ यत्रा चक्रुरमृता गातुम २
स्मै श्येनो न दीयन्नन्वेति पाथः॥ उदु त्यद्दर्शतं वपुर्दिव ए

ति पनिहरे॥ यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अ
रं॥ शीर्ष्णः शीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः॥
सप्त स्वसारः सुविताय सूर्यं वहंति हरितो रथे [illegible]॥ तच्चक्षु
र्देवहितं शुक्रमुच्चरत्॥ पश्येम शरदः शतं जीवेम शरदः शतं॥
बण्महाँ असि सूर्य बळादित्य महाँ असि॥ महस्ते सतो
महिमा पनस्यतेद्धा देव महाँ असि॥ बट् सूर्य श्रवसा महाँ
असि सत्रा देव महाँ असि॥ मह्ना देवानामसुर्यः पुरो
हितो विभु ज्योतिरदाभ्यं॥ नमो मित्रस्य वरुणस्य च
क्षसे महो देवाय तदृतं सपर्यत॥ दूरेदृशे देवजाताय
केतवे दिवस्पुत्राय सूर्याय शंसत॥ सा मा सत्योक्तिः
परिपातु विश्वतो द्यावा च यत्र ततनन्नहानि च॥ विश्व
मन्यन्निविशते यदेजति विश्वाहापो विश्वाहोदेति सूर

र्यः।नतेअदेवः‍प्रदिवोनिवासतेयदेतशेभिःपतरैरथर्यसि।
प्राचीनमन्यदनुवर्त्ततेरजउदन्येनज्योतिषायासिसूर्य।
३ येनसूर्यज्योतिषाबाधसेतमोजगच्चविश्वमुदियर्षिभा
नुना।तेनास्मद्विश्वामनिरामनाहुतिमपामीवामपदुष्व
प्न्यंसुव॥विश्वस्यहिप्रेषितोरक्षसिव्रतमहेळयन्नुच्च
रसिस्वधाअनु।यदद्यत्वासूर्योपब्रवामहैतंनोदेवा
अनुमंसीरतक्रतुं॥तंनोद्यावापृथिवीतन्नआपइंद्रः
शृण्वंतुमरुतोहवंवचः॥माशूनेभूमसूर्यस्यसंदृशि
भद्रंजीवंतोजरणामशीमहि॥१॥विश्वाहात्वासुम
नसःसुचक्षसःप्रजावंतोअनमीवाअनागसः।उद्यं
तंत्वामित्रमहोदिवेदिवेज्योग्जीवाःप्रतिपश्येमसू २
र्य॥महिज्योतिर्बिभ्रतंत्वाविचक्षणभास्वंतंचक्षुषे

चक्षुषेमयः॥आरोहंतंबृहतःपाजसस्परिवयंजी[illegible]
तिपश्येमसूर्य।यस्यतेविश्वाभुवनानिकेतुनाप्रचेरतेनि
चविशंतेअक्तुभिः।अनागास्त्वेनहरिकेशसूर्याह्नाह्ना
नोवस्यसावस्यसोदिहि।शंनोभवचक्षसाशंनोअह्ना
शंभानुनाशंहिमाशंघृणेन।यथाशमध्वंछमसद्दुरोणेत
त्सूर्यद्रविणंधेहिचित्रं॥अस्माकंदेवाउभयायजन्म
नेशर्मयच्छतद्विपदेचतुष्पदे।अदत्पिबदूर्जयमानमा
शितंतदस्मेशंयोररपोदधातन॥यद्वोदेवाश्चकृमजि
ह्वयागुरुमनसोवाप्रयुतीदेवहेळनं॥अरावायोनोअ
भिदुच्छुनायतेतस्मिन्तदेनोवसवोनिधेतन॥२॥सू
र्योनोदिवस्पातुवातोअंतरिक्षात्।अग्निर्नःपार्थिवे
भ्यः।जोषासवितर्यस्यतेहरःशतंसवाँअर्हति।पाहि

नोदिद्युतः पतंत्सा ॥ चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः ॥
४ चक्षुर्धाता दधातु नः ॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनू
भ्यः ॥ सं चेदं वि च पश्येम ॥ सुसंदृशं त्वा वयं प्रतिपश्येम
सूर्य ॥ विपश्येम नृचक्षसः ॥ ३ ॥ विभ्राड् बृहत्पिबतु सोम्यं
मध्वायुर्दधद्यज्ञपतावविह्रुतं ॥ वातजूतो यो अभिरक्षति
त्मना प्रजाः पुपोष पुरुधा विराजति ॥ विभ्राड् बृहत्सुभृतं
वाजसातमं धर्मं दिवो धरुणे सत्यमर्पितं ॥ अमित्रहा
वृत्रहा दस्युहंतमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥ इदं श्रे
ष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ॥
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो ४
अच्युतं ॥ विभ्राजं ज्योतिषा स्वरगच्छो रोचनं दिवः ॥

येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ॥ ४ ॥
आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ॥ पितरं च प्रयन्त्स्वः ॥
अंतश्चरति रोचनास्य प्राणादपानती ॥ व्यख्यन्महिषो दि
वं ॥ त्रिंशद्धाम विराजति वाक्पतंगाय धीयते ॥ प्रति वस्तो
रह द्युभिः ॥ ८ ॥ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ॥ ततो
रात्र्यजायत ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधि संवत्स
रो अजायत ॥ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥
सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् ॥ दिवं च पृथि
वीं चांतरिक्षमथो स्वः ॥ ६ ॥ ७ ॥ ॥ ॥

॥ सविता पश्चातात्सविता पुर ॥ ॥ ॥ ७